# Garbhagatakrishnastutih

# ગર્ભગતકૃષ્ણસ્તુતિઃ

## Document Information

Text title : garbhagatakRRiShNastutiH

File name : garbhagatakRRiShNastutiH.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : VishnuStuthi Manjari 3

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 5, 2021

*sanskritdocuments.org*

# ગર્ભગતકૃષ્ણસ્તુતિઃ

(દેવૈઃ કૃતા)

સત્યવ્રતં સત્યપરં ત્રિસત્યં સત્યસ્ય યોનિં નિહિતં ચ સત્યે ।
સત્યસ્ય સત્યમૃતસત્યનેત્રં સત્યાત્મકં ત્વાં શરણં પ્રપન્નાઃ ॥ ૧॥

એકાયનોઽસૌ દ્વિફલસ્ત્રિમૂલશ્ચતૂરસઃ પઞ્ચવિધઃષડાત્મા ।
સપ્તત્વગષ્ટવિટપો નવાક્ષો દશચ્છદી દ્વિખગો હ્યાદિવૃક્ષઃ ॥ ૨॥

ત્વમેક એવાસ્ય સતઃ પ્રસૂતિસ્ત્વં સન્નિધાનં ત્વમનુગ્રહશ્ચ ।
ત્વન્માયયા સંવૃતચેતસસ્ત્વાં પશ્યન્તિ નાના ન વિપશ્ચિતો યે ॥ ૩॥

બિભર્ષિ રૂપાણ્યવબોધ આત્મા ક્ષેમાય લોકસ્ય ચરાચરસ્ય ।
સત્ત્વોપપન્નાનિ સુખાવહાનિ સતામભદ્રાણિ મુહુઃ ખલાનામ્ ॥ ૪॥

ત્વય્યમ્બુજાક્ષાખિલસત્ત્વધામ્નિ સમાધિનાઽઽવેશિતચેતસૈકે ।
ત્વત્પાદપોતેન મહત્કૃતેન કુર્વન્તિ ગોવત્સપદં ભવાબ્ધિમ્ ॥ ૫॥

સ્વયં સમુત્તીર્ય સુદુસ્તરં દ્યુમન્ ભવાર્ણવં ભીમમદભ્રસૌહૃદાઃ ।
ભવત્પદામ્ભોરુહનાવમત્ર તે નિધાય યાતાઃ સદનુગ્રહો ભવાન્ ॥ ૬॥

યેઽન્યેઽરવિન્દાક્ષ વિમુક્તમાનિનસ્ત્વય્યસ્તભાવાદવિશુદ્ધબુદ્ધયઃ ।
આરુહ્ય કૃચ્છ્રેણ પરં પદં તતઃ પતન્ત્યધોઽનાદૃતયુષ્મદઙ્ઘ્રયઃ ॥ ૭॥

તથા ન તે માધવ તાવકાઃ ક્વચિદ્ભ્રશ્યન્તિ માર્ગાત્ત્વયિ બદ્ધસૌહૃદાઃ ।
ત્વયાઽભિગુપ્તા વિચરન્તિ નિર્ભયા વિનાયકાનીકપમૂર્ધસુ પ્રભો ॥ ૮॥

સત્ત્વં વિશુદ્ધં શ્રયતે ભવાન્ સ્થિતૌ શરીરિણાં શ્રેય ઉપાયનં વપુઃ ।
વેદક્રિયાયોગતપઃસમાધિભિસ્તવાર્હણં યેન જનઃ સમીહતે ॥ ૯॥

સત્ત્વં ન ચેદ્ધાતરિદં નિજં ભવેદ્વિજ્ઞાનમજ્ઞાનભિદાપમાર્જનમ્ ।
ગુણપ્રકાશૈરનુમીયતે ભવાન્ પ્રકાશતે યસ્ય ચ યેન વા ગુણઃ ॥ ૧૦॥

ન નામરૂપે ગુણજન્મકર્મભિર્નિરૂપિતવ્યે તવ તસ્ય સાક્ષિણઃ ।

મનોવચોભ્યામનુમેયવર્ત્મનો દેવ ક્રિયાયાં પ્રતિયન્ત્યથાપિ હિ ॥ ૧૧॥

શ‍ૃણ્વન્ ગૃણન્ સંસ્મરયંશ્ચ ચિન્તયન્નામાનિ રૂપાણિ ચ મઙ્ગલાનિ તે ।
ક્રિયાસુ યસ્ત્વચ્ચરણારવિન્દયોરાવિષ્ટચેતા ન ભવાય કલ્પતે ॥ ૧૨॥

દિષ્ટ્યા હરેઽસ્યા ભવતઃ પદો ભુવો ભારોઽપનીતસ્તવ જન્મનેશિતુઃ ।
દિષ્ટ્યાઙ્કિતાં ત્વત્પદકૈઃ સુશોભનૈર્દ્રક્ષ્યામ ગાં દ્યાં ચ તવાનુકમ્પતામ્ ॥

ન તેઽભવસ્યેશ ભવસ્ય કારણં વિના વિનોદં બત તર્કયામહે ।
ભવો નિરોધઃ સ્થિતિરપ્યવિદ્યયા કૃતા યતસ્ત્વય્યભયાશ્રયાત્મનિ ॥ ૧૪॥

મત્સ્યાશ્વકચ્છપનૃસિંહવરાહહંસ-
      રાજન્યવિપ્રવિબુધેષુ કૃતાવતારઃ ।
ત્વં પાસિ નસ્ત્રિભુવનં ચ યથાધુનેશ
      ભારં ભુવો હર યદૂત્તમ વન્દનં તે ॥ ૧૫॥

દિષ્ટ્યામ્બ તે કુક્ષિગતઃ પરઃ પુમાનંશેન સાક્ષાદ્ભગવાન્ ભવાય નઃ ।
મા ભૂદ્ભયં ભોજપતેર્મુમૂર્ષોર્ગોપ્તા યદૂનાં ભવિતા તવાત્મજઃ ॥ ૧૬॥

ઇતિ શ્રીમદ્ભાગવતે દશમસ્કન્ધે દ્વિતીયાધ્યાયાન્તર્ગતા
દેવકૃતા ગર્ભગતકૃષ્ણસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Garbhagatakrishnastutih*
pdf was typeset on December 5, 2021

Please send corrections to *sanskrit@cheerful.com*